## कन्था च। (१२४/३८५८)

[1]तत्पुरुषे समासे नपुंसकलिङ्गे कन्थाशब्दः उत्तरपदमाद्युदात्तं भवति। सौशमिकन्थम्। आह्वरकन्थम्। [2]चप्पकन्थम्। 'सञ्ज्ञायां कन्थोशीनरेषु' (२.४.२०/८२३) इति नपुंसकलिङ्गता। षष्ठीसमासा एते। नपुंसके इत्येव, दाक्षिकन्था॥

## आदिश्चिहणादीनाम्। (१२५/३८५९)

[3]कन्थान्ते तत्पुरुषे समासे नपुंसकलिङ्गे चिहणादीनामादिरुदात्तो भवति। चिहणकन्थम्। मडरकन्थम्। मडुर इति केचित् पठन्ति। मडुरकन्थम्।

चिहण। मडर। मडुर। वैतुल। पटत्क। वैतालिकर्णः। वैतालिकर्णिः इत्यन्ये पठन्ति। [4]कुक्कुट। चिक्कण। चित्कण इत्यपरे पठन्ति।

आदिः इति वर्तमाने पुनरादिग्रहणं पूर्वपदाद्युदात्तार्थम्॥

## चेलखेटकटुककाण्डं गर्हायाम्। (१२६/३८६०)

[5]चेल खेट कटुक काण्ड इत्येतानि उत्तरपदानि तत्पुरुषे समासे गर्हायां गम्यमानायामाद्युदात्तानि भवन्ति। पुत्रचेलम्। भार्याचेलम्। उपानत्खेटम्। नगरखेटम्। दधिकटुकम्। उदश्वित्कटुकम्। भूतकाण्डम्। प्रजाकाण्डम्। चेलादिसादृश्येन पुत्रादीनां गर्हा। तत्र पुत्रः चेलमिव इति विगृह्य व्याघ्रादेराकृतिगणत्वाद् उपमितं व्याघ्रादिभिः (२ १.५६/७३५) इति समासः। गर्हायाम् इति किम्? परमचेलम्॥

## चीरमुपमानम्। (१२७/३८६१)

चीरमुत्तरपदमुपमानवाचि तत्पुरुषे समासे आद्युदात्तं भवति। वस्त्रं चीरमिव वस्त्रचीरम्। [6]पटचीरम्। कम्बलचीरम्। उपमानम् इति [8]किम्? परमचीरम्॥

## पललसूपशाकं मिश्रे। (१२८/३८६२)

पलल सूप शाक इत्येतान्युत्तरपदानि मिश्रवाचिनि तत्पुरुषे समासे आद्युदात्तानि भवन्ति। गुडपललम्। घृतपललम्। घृतसूपः। मूलकसूपः। घृतशाकम्। मुद्गशाकम्। गुडेन मिश्रं पललम् गुडपललम्। 'भक्ष्येण [9]मिश्रीकरणम्' (२.१.३५/६९७) इति समासः। मिश्रे इति किम्? परमपललम्॥

---

1. कन्थान्ते इत्यधिकम् फ. ह. 2. नास्ति फ, चैत्रकन्थम् ड. 3. कन्थान्ततत्पुरुषे फ. 4. कुक्कुट नास्ति क. 5. चेलखेटादीनि क, कटुक नास्ति फ. 6. पटचीरम् नास्ति क. ड. फ. ह. 7. उदाहरणमिदं नास्ति ह. 8. किम् नास्ति फ. 9. मिश्रकरणम् फ.